International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(1): 93-95
© 2026 IJMH
www.themultijournal.com

Received: 27-01-2026
Accepted: 11-02-2026
Publish : 12-02-2026

**नन्दिनी देहेरी**
शोधछात्री,
केन्द्रीय संस्कृत विश्वविद्यालयः,
तिरूपतिः,आन्ध्रप्रदेसः-517507

**Correspondence:**
**नन्दिनी देहेरी**
शोधछात्री,
केन्द्रीय संस्कृत विश्वविद्यालयः,
तिरूपतिः,आन्ध्रप्रदेसः-517507

# पण्डितहरिप्रसादद्विवेदिशास्त्रीविरचितस्य गोस्वामितुलसीदासचरितमहाकाव्ये महाकाव्यलक्षणसमन्वयः

**नन्दिनी देहेरी**

## संस्कृतसाहित्ये महाकाव्यस्वरूपम्-

संस्कृतसाहित्ये काव्यं नाम अत्यन्तं महत्वपूर्णं साहित्यरूपमस्ति। काव्यस्य द्वे प्रमुखे भेदे स्तः- श्रव्यकाव्यं दृश्यकाव्यञ्च। श्रव्यकाव्येषु महाकाव्यं प्रमुखतमं गौरवपूर्णं च काव्यरूपं मन्यते। महाकाव्यं न केवलं काव्यरचना,अपितु संस्कृतसंस्कृतेः, धर्मस्य, नीतिशास्त्रस्य, इतिहासस्य च दर्पणरूपेण प्रतिष्ठितमस्ति। अतः संस्कृतवाङ्मये काव्यपरम्परायां महाकाव्यं शिरोमणिमिति कथ्यन्ते। संस्कृतसाहित्य-शास्त्रे महाकाव्यानां चर्चा सर्वप्रथमे भामहेन कृतवान्। तत्पश्चात् दण्डिः विश्वनाथकविराज-आनन्दवर्धन स्वस्वालङ्कारिकग्रन्थे महाकाव्यलक्षणस्वरूपश्च विषये प्रतिपादितवन्तः। महाकाव्यस्य व्युत्पत्तिः यदि पश्यामः ‘महत्काव्यं’ महाकाव्यमिति कथ्यन्ते। वाल्मीकिरामायणे महाकाव्यमिति शब्दस्य वर्णना दृश्यते यथा-

**किं प्रमाणमिदं काव्यं का प्रतिष्ठा महात्मनः।**
**कर्त्ता काव्यस्य महतः क्व चासौ मुनिपुंगवः।।**[1]

महाभारतेऽपि महाकाव्यशब्दस्य प्रयोगः भवति। यथा-

**कृतं ममेदं भगवत काव्यं परमपूजितम्**
**ब्रह्मन् वेदरहस्यं च यच्चान्यत् स्थापितं यया।**
**इतिहास पुराणनामुन्मेषं निर्मित्तं च यत्।**
**काव्यस्य लेखनार्थाय गणेशः स्मर्यतां मुनेः।**
**अलंकृतं शुभैः शब्दैः समयैर्दिव्यमानुषैः।**
**छंदो वृतैश्च विविधैरन्तितं विदुषा प्रियम्।।**[2]

संस्कृतसाहित्ये काव्यद्वयं प्रसिद्धं श्रव्यकाव्यं दृश्यकाव्यञ्च। श्रव्यकाव्येषु महाकाव्यं प्रमुखतमं स्थानं धारयति। महाकाव्यस्य लक्षणं सर्गबन्धं सर्वथा सार्थकमस्ति। अतैव उच्यते सर्गबन्धो महाकाव्यं । महाकविमाधः श्लोकेन समन्वितः महाकाव्यमिति उक्तवान् यथा-

**श्लोकैरिव महाकाव्यम्।।**[3]

महाकाव्यलक्षणं बहवः आलङ्कारिकः निरूपितवान्। परन्तु आचार्य विश्वनाथः महाकाव्यलक्षणं साहित्यदर्पणे एवमेव प्रतिपादितं यथा-

**सर्गबन्धो महाकाव्यं तत्रैको नायकः सुरः**
**सद्वंशः क्षत्रिय वापि धीरोदात्तगुणान्वितः।**
**एकवंशभवा भूपाः कूलजा बहवोऽपि वा।**
**शृङ्गारवीरशान्तनामेकोऽङ्गी रस ईष्यते।।**
**अङ्गानि सर्वेऽपि रसाः, सर्वे नाटकसन्धयः।**
**इतिहासोद्धवं वृत्तमन्यदा सज्जनाश्रयम्।।**
**चत्वारस्तस्य वर्गाः स्युस्तेष्वेकं च फलं भवेत्**
**आदौनमक्रियाशीर्वा वस्तुनिर्देश एव वा।।**
**क्वचिन्निन्दा स्वलादीनां सतां च गुणकीर्त्तनम्।**
**एकवृत्तमयैः पद्यैरवसानेऽन्यवृत्तकैः।।**
**नास्तिस्वल्पा नातिदीर्घाः सर्गाः अष्टाधिका इह।**
**नानावृत्तमयः क्वापि सर्गः कश्चन दृश्यते।।**

**सर्गान्ते भाविसर्गस्य कथायाः सुचनं भवेत्।**
**सन्ध्यासूर्येन्दुरजनीप्रदोषध्वान्तवासराः**
**प्रातर्मध्याह्लमृगयाशैलर्त्तु वनसागराः।।**
**सम्भोगविप्रलम्भौ च मुनिस्वर्गपुराघ्वराः।**
**रणप्रयाणोपयममन्त्रपुत्रोदयादयः।।**
**वर्णनीया यथायोगं साङ्गोपाङ्ग अमी इह।**
**कवेर्वृत्तस्य वा नाम्ना नायकस्येतरस्य वा।**
**नामास्य सर्गोपादेय कथया सर्गनाम तु।।**[4]

**तुलसीदासचरितमहाकाव्ये महाकाव्यलक्षणसमन्वयः-**
**सर्गबन्धो महाकाव्यं तत्रैक नायकः सुराः।**
**सद्वंशः क्षत्रियो वापि धीरोदात्तगुणान्वितः।।**[5]

'सर्गबन्धो महाकाव्यम्' इति लक्षणानुसारं महाकाव्यं सर्गेण निबद्धः भवेत्। एवं महाकाव्यस्य नायकः देवता क्षत्रियः, सद्वंशेजातः धीरोदात्तः,वीरः वा नायकः भविष्यति। अतः अस्य लक्षणानुसारं तुलसीदासचरितमहाकाव्ये एकादशसर्गाः सन्ति। अस्य महाकाव्यस्य नायकः स्वयं तुलसीदासः। यस्य तुलना रामेण सह प्रथमश्लोके कविना कृतम्। सः सद्वंशे अर्थात् ब्राह्मणकूले जातः धीरोदात्तः नायकः यस्य लक्षणं साहित्यदर्पणे प्रतिपादितमस्ति यथा-

**अविकत्थनः क्षमावानातिगम्भीरो महासत्त्व**
**स्थेयान्निगुढमानो धीरदात्तो दृढव्रतः कथितः।।**[6]

अर्थात् अविवादः,क्षमाशीलः,गम्भीरः,दृढनिश्चयः,अविकथन(आत्मनः प्रशंसा न करोति) विनम्रशीलः,धैर्यवान्,परोपकारश्च,धीरोदात्त नायकः भविष्यति। महाकाव्येऽस्मिन् तुलसीदासः विनम्रगुण-युक्तः, पितृमातृगुरूजनानामाज्ञाकारी, सः पुत्रवियोगे दुःखीताऽपि स्व सिद्धन्तमाचरन्ति। पुण्यकर्मणा मनुषस्य कृते सुखं प्राप्ति भवति एवं दुष्कर्मः मनुष्य कृते दुःखस्य कारणं भवति, इति मनसि दृढप्रतिज्ञां कृत्वा पूर्व अपेक्षा अत्यधिक पूण्यकर्ममकरोत्। धीरोदात्त नायकस्य समस्तलक्षणं तुलसीदासस्य चरित्रे दृश्यते।

**एकवंशभवा भूपाः कूलजा बहवोऽपि वा।**
**शृङ्गारवीरशान्तनामेकोऽङ्गी रस ईष्यते।।**[7]

अर्थात् उत्तमकूले जातः अस्य नायकः भवेत्। तुलसीदासः सुप्रसिद्धः कविः साहित्यकारः भक्तप्रवरः ब्राह्मणकूले जातः। सः तुलसीदासः असाधारणनायकः अपितु एते चांशकला विष्णोरामस्तु भगवान् स्वयमिति मतानुसारं सूर्यकूलशिरोमणि भगवतः श्रीरामस्य परमभक्तः सः काव्यनायकः आसीत्। पुनः शृङ्गारः,वीरः,शान्त रसेषु एकमेव अङ्गी(प्रधान)रस रूपेण भवति। अतः महाकाव्येऽस्मिन् शान्तरसः प्रधानं भवति। धीरशान्त भक्तश्रेष्ठ तुलसीदासस्य चरित्रकथा,पुनः तस्य वैराग्यः,पाण्डित्यं,परमात्माविषय-कमनुरागः,ईश्वरं प्रति प्रबलभक्तिः,काशी,अयोध्या,चित्रकूटः,प्रयागः,मथुरायाःअर्थात् तीर्थक्षेत्राणां वर्णनम्। राम-सीता-शिव-हनुमान-कालभैरव-गणेश-कृष्ण इत्यादीनां वन्दनायाम् अस्य काव्यस्य अङ्गीरसः शान्तरसः इति ज्ञातुं शक्यते। शान्तरसस्योदाहरणम्-

**अयोध्यायां काश्यां क्वचिदपि नगे चित्रिशखरे**
**निवासं भक्तेन्द्रो विदग्धदुपेदेशांश्च सुखदान्।**
**ददन्नृभ्यो न्त्यं चरमवयसीशाननगरे**
**न्यावत्सीत् साकेतं जिगमिषुरशोकाऽभयपदम्।।**[8]

**अङ्गानि सर्वेऽपि रसाः सर्वे नाटक सन्धयः।**
**इतिहासोद्भवो वृत्तमन्यदा सज्जनाश्रयम्।।**[9]

महाकाव्येऽस्मिन् शान्तरसः अङ्गी वर्त्तते। अन्ये सर्वे रसाः करूण-शृङ्गारः-वात्सल्यश्च अङ्ग रसरूपेण कविना प्रदर्शितम्। पुनः महाकाव्यस्य वृत्तं इतिहासप्रसिद्धमथवा सज्जनाश्रयं भवति। अस्य महाकाव्यस्य उपजीव्यं रामचरित्रमानसं तथा वाल्मीकिय रामायण-मिति स्वीकर्त्तुं शक्यते। पुनः महाकाव्यस्य नायकः तुलसीदासः सत्पुरूषः आसीत्। अन्यानि पात्राणि यथा नन्ददा-सः,रत्ना-वली,गुरूनृसिंहः,स्वामिविट्ठलेश्वरश्चसत्पात्राणि सन्ति।

**चत्वारस्तस्य वर्गाः स्युस्तेष्वेकं च फलं भवेत्**
**आदौनमक्रियार्शीर्वा वस्तुनिर्देश एव वा।।**[10]

धर्मार्थकाममोक्षरूपी चत्वारपुरूषार्थाः सन्ति। अतः धर्मार्थ-काम-मोक्षः चर्तुवर्गफलप्राप्ति आधारीकृत्य महाकाव्यस्य रचना भवति। अस्य काव्यस्य मुख्योद्देश्यमस्ति मोक्षप्राप्तिः धर्मार्थकाव्यफलं त्यागेन सिद्धा भवति। यथैव काव्येऽस्मिन् तुलसीदासः प्रत्यहः त्रिकालसन्ध्या पञ्चमहायज्ञं तर्पणादि धर्मकार्यमकरोत्। पुनः मोक्षप्रप्तार्थं वैराग्य-ग्रहणं कृत्वा भगवतः भजनं कीर्त्तनं कृतवान्। पुनः ग्रन्थस्य निर्विघ्नपरिसमास्यर्थं ग्रन्थारम्भे मङ्गलाचरणमनिवार्यम् अस्ति। नमस्कारात्मक-आर्शीर्वादात्मक-वस्तुनिर्देशात्मक मङ्गला-चरणेषु कस्यापि एकस्य मङ्गलाचरणं भवेत्। अतः तुलसीदास-चरित-महाकाव्ये कविना ग्रन्थारम्भे पुरूषोत्तमस्याशीर्वाद प्राप्त्यर्थं प्रार्थना कृतः। यथा-

**श्रीमान् सतां धर्मवतां महात्मनां**
**यो रक्षको धर्मपथस्य भूतले।**
**आस्थापकश्चागमवेदसंस्कृतेः,**
**शन्नः स कुर्यात् पुरूषोत्तमः सदा।।**[11]
**क्वचिन्निन्दा स्वलादीनां सतां च गुणकीर्त्तनम्।**
**एकवृत्तमयैः पद्यैरवसानेऽन्यवृत्तकैः।।**[12]

केषुचित् स्थानेषु सज्जनाप्रशंसा,दुर्जननिन्दाऽपि भवति। महाकाव्येऽस्मिन् सत्पुरूषः राजायति,गुरूनृसिंहस्य प्रशंसा भवति। यथा-

**विवेकशीलेषु बुधेषु हंसः**
**परापकृत्क्रूरनरेषु सिंहः।।**
**यः सर्वदा स्वयतने विधेया**
**नध्यापयामास सुरानिवेज्य।।**[13]

दुर्जननिन्दा- **अभूत्ततः सर्वत एव सुद्युते।**
**र्यशः प्रकाशस्तुलसीकलानिधेः।**
**तदीर्ष्यया तं प्रति सेर्ष्यमानवै-**
**रूपद्रवोऽकारि विधुन्तुदोपमैः।।**[14]

यद्यापि महाकाव्ये विविधः वृत्तयः दृश्यन्ते। तथापि प्रत्येकस्य सर्गस्यान्तिमे छन्दसः परिवर्त्तनं भवति। महाकाव्येऽस्मिन् प्रथमसर्गे प्रथमश्लोकतः 43 श्लोकं यावत् वंशस्थ छन्दसः प्रयोगः भवति। परन्तु अन्तिमश्लोके शार्दूलविक्रीडित छन्दसः प्रयोगोऽस्ति। पुनः सर्गस्य मध्येऽपि भिन्न भिन्न छन्दसः प्रयोगः दृश्यते। यथा प्रथमसर्गस्य 44 एवं 49तमे श्लोके इन्द्रवज्रा 50,51 श्लोके मालिनी छन्दसः प्रयोगः अभवत्।

**नास्तिस्वल्पा नातिदीर्घा सर्गा अष्टाधिका इह।**
**नानावृत्तमयः क्वापि सर्गः कश्चन दृश्यते।।**
**सर्गान्ते भाविसर्गस्य कथायाः सूचनं भवेत्।**[15]

महाकाव्ये न्यूनातिन्यूनम् अष्टौ सर्गाः भविष्यन्ति। सर्गाः अत्यल्पः अतिदीर्घश्च न भवेत्। प्रत्येकसर्गस्य अन्तिमे भाविसर्गस्य विषयः सूचितः भवेत्। महाकाव्येऽस्मिन् महाकवि हरिप्रसादेन महाकाव्य-लक्षणानुसारम् अष्टाधिका सर्गाः अर्थात् एकादशसर्गाः सन्ति। यत् नाति अल्पः नाति दीर्धः भवति। पुनः पञ्चमसर्गस्य अन्तिमे षष्ठसर्गे अर्थात् (तीर्थयात्रा) विषये सूचितः अस्ति। पुनः महाकाव्ये केचन सर्गाः भवन्ति यत्र वहुनां छन्दसां प्रयोगः भवति। यथा-महाकाव्येऽस्मिन् चतुर्थसर्गे अनुष्टुप्,इन्द्रवज्रा,द्रुतविलम्बित,भद्रवि-राट्,रथोद्धाता,स्रग्धरा एकादशसर्गे इन्द्रवज्रा,उपजाति,तुणक,तोट-क,पृथ्वी,भुजङ्गप्रयात,वंशस्थ,शालिनी,वसन्ततिल-का इत्यादिनां छन्दसां प्रयोगः भवति।

**सन्ध्यासूर्येन्दुरजनी प्रदोषध्वान्तवासराः**
**प्रातर्मध्याह्लमृगया शैलर्त्तुवनसागराः।।**[16]

महाकाव्ये सन्ध्या सूर्य-चन्द्रोदयः वा सूर्यास्तः,रजनी,अन्ध-कारः,दिवसः,प्रातः, ध्यानः, पर्वतः,वनम्,नदीसमुद्रः,ऋतुवर्णना च भवेत्। महाकाव्येऽस्मिन् कविना पञ्चमसर्गे सूर्योदयः,दीवसः,ऋतु-वर्णनं कृतम्। पुनः गङ्गा,यमुनादीनां नदीनां चित्रकूटपर्वतः भगवतश्रीरामस्य नामजपं,ध्यानश्च वर्णनमकरोत्। यथा महाकाव्ये-ऽस्मिन्-

**एवं स्वधर्ममहिते ऋतुषट्ककाले,**
**नित्यं श्रुतिस्मृतिपुराणमतं स्वधर्मम्।**
**धर्म्याञ्च वृत्तिमनघामुपसेवमानः,**
**श्रीहौलसेयविबुधौ न्यवसत् सुखेन।।**[17]
**सम्भोग विप्रलम्भौ च मुनिस्वर्गपुराध्वराः।**
**रणप्रयाणोपगम मन्त्रपुत्रोदयादयः।।**[18]

सम्भोगशृङ्गारः विप्रलम्भशृङ्गारः इति मध्ये मध्ये वर्णना भवेत्। पुनः ऋषिमुनीनां दर्शनम्,सर्गः,यज्ञः,विवाहः,पुत्रोत्पत्तिः इत्यादयः विषयाः भवेत्। महाकाव्येऽस्मिन् पञ्चमसर्गे तुलसीदासरत्नावल्याः सम्भोगशृङ्गारः,पुनः अष्टमनवमसर्गे उभयोः विच्छेदेन रत्नावल्याः विप्रलम्भशृङ्गारः वर्णनमकरोत्। एवं तृतीयसर्गे तुलसीदासस्य जन्मविषये,अष्टमनवमसर्गे मुनीनां दर्शनमर्थात् यतिमुनेः दर्शन-मित्यादयाः विषयाः वर्णितम्। यथा-

**भवतः स्म रथाङ्गयुग्मवत्,**
**प्रणयाबद्धहृदावुभौ मिथः।**
**इह चित्रकथं किमुच्यतां,**
**प्रणयिप्रेमनिबन्धनं भुवि।।**[19]
**वर्णनीया यथायोग्यं साङ्गोपाङ्ग अमी इह।**
**कवेर्वृत्तस्य नाम्ना वा नायकस्येतरस्य वा।**
**नामास्य सर्गोपादेय कथया सर्गनाम तु।।**[20]

अर्थात् महाकाव्यस्य नामकरणं कवेः नामानुसारं,विषयवस्तोः नामानुसारं,नायकस्यनामानुसारं वा भवेत्। अतः अस्मिन् महाकाव्ये नायकस्य तुलसीदासस्य चरित्रं वर्णितमस्ति। अतः अस्य महाकाव्यस्य नाम तुलसीदासचरितमहाकाव्यमस्ति। एवमेव सर्गस्य नाम कथावस्तु नामानुसारं भविष्यतीति विश्वनाथस्य मतमस्ति। यथा प्रभातवर्णनं नाम प्रथमसर्गः,तथैव अयं महाकाव्ये सुकरक्षे-त्रं,तुलसीदासस्य चरित्रवर्णनं नाम प्रथमसर्गः,तुलसीदासस्यवंशवर्णनं नाम द्वितीयसर्गः। पुनः तीर्थक्षेत्राणां वर्णनं नाम षष्ठसर्गः,ऋतुवर्णनं नाम पञ्चमसर्गः भवति।

एवमेव पण्डितहरिप्रसादद्विवेदी महोदयेन महाकाव्यस्य लक्षणा-नुसारं तुलसीदासचरितमहाकाव्यमित्यस्य सप्रमाणेन प्रतिपादितम्। पुनः आधुनिककवीनां महाकाव्य लक्षणं पश्यामश्चे प्रो.अभिराज-राजेन्द्रमिश्रप्रणीते अभिराजयशोभूषणग्रन्थे प्रतिपादितं महाकाव्य-लक्षणमस्मिन् महाकाव्ये सम्पूर्णरूपेण समन्वितं भवति।

**संन्दर्भग्रन्थसूची-**

1.संस्कृतसाहित्य का समग्र इतिहास,राधावल्लभत्रिपाठी,चौखम्बा सुरभा-रती प्रकाशनम्,2020
2.साहित्यदर्पणम्,प्रो.सूर्यमणि रथः,सांविदप्रकाशनम्,पुरी,2027
3.गोस्वामितुलसीदासचरितं महाकाव्यम्-पं.हरिप्रसादद्विवेदिशास्त्री, राम-जीवन द्विवेदी प्रकाशन्,कृष्ण सदन,ज्वालापुर,हरिद्वार-249407
4.शिशुपालवधमहाकाव्यम्-महाकविमाघः,कितावमहल,कटक-753003

**संन्दर्भ**

1. रामायणम्.उ.का-64.23
2. म.भा.आदि.प.अनुक्रमणिका.प्र.अ-61,62,129
3. शिशुपालवधम्-19.41
4. सा.द-6.315-324
5. सा.द-6.315
6. सा.द-3.32
7. सा.द-6.316
8. गो.तु.च.म-11.60
9. सा.द-6.317
10. सा.द-6.318
11. गो.तु.च.म-1.1
12. सा.द-6.319
13. गो.तु.च.म-4.22
14. गो.तु.च.म-10.2
15. सा.द-6.320,321
16. सा.द-6.322
17. गो.तु.च.म-5.42
18. सा.द-6.323
19. गो.तु.च.म-8.4
20. सा.द-6.324